न्यूनाधिकैरपि क्षणैर्व्यवहितानि स्युः। न च तद्युक्तम्। न चैवं केषाञ्चिदल्पैर्व्यवधानं गुणो भविष्यतीति वाच्यम् यथाधिकैर्व्यवधानेऽश्रुतकरणम् एवं न्यूनैरपि व्यवधाने अश्रुतकरणमेव। तस्मादेकविंशतेः पशूनां साहित्यसम्पत्तये प्रयोगविधिनायं क्रमः पदार्थानां मिथ एकविंशतिक्षणव्यवधानात्मकोऽपेक्षितः। स न्यूनाधिकैश्च व्यवधाने बाध्येत। अतः सर्वेषां तुल्यप्रत्यासत्तिसिद्धौ प्रथमपदार्थक्रम एव द्वितीयादिष्वाश्रयणीय इति सिद्धम्। अत्राङ्गानां मिथः प्रत्यासत्तिर्नियमकारणम्, मुख्यक्रमे तु अङ्गानां प्रधानप्रत्यासत्तिरिति विशेषः। मुख्यक्रमप्रवृत्तिक्रमयोर्विरोधे च मुख्यक्रमो बलीयान्। तद्यथा दर्शपूर्णमासयोः सांनाय्यधर्माः शाखाच्छेदनादयः पूर्वं प्रवर्त्तन्ते पश्चादाग्नेयधर्माः, प्रदानं त्वाग्नेयस्य प्रथमम् पश्चात्सांनाय्यस्य ततः स्विष्टकृदवदानं प्रयाजशेषाभिघारणं प्राशदानं वेद्यासादनादिकं च किं प्रवृत्तिक्रमात् सांनाय्यस्य पूर्वं भवति? उत मुख्यक्रमादाग्नेयस्येति? संदेहादनियमे प्राप्ते मुख्यक्रमो बलीयानित्युच्यते। अस्मिन् हि आश्रीयमाणे अल्पीयांसः प्रथमपदार्थाः प्रधानाद्विप्रकृष्यन्ते अन्ये सर्वे संनिकृष्टा भवन्ति प्रवृत्तिक्रमे तु बहूनां विप्रकर्षः। पूर्वं तु क्वच प्रवृत्तिरस्यां बलीयसा पाठक्रमेण मुख्यक्रमो बाध्यते प्राशदानादिषु पाठक्रमाभावात् प्रवृत्तिक्रमो मुख्यक्रमेण बाध्यते। अथ स्थानप्रमाणमुच्यते। साद्यस्के "सह पशूनालभेत" इति (मत०२२,३,२८,) श्रूयते साहित्यं च सवनीयस्य स्थाने। तत्र किमुपाकरणादौ अनियमः? अथवाग्नीषोमीयस्य प्रथममुपाकरणम्? अथवा सवनीयस्येति?। तत्र नियमकारणाभावादनियमे प्राप्ते प्रकृतिवदग्नीषोमीयस्य प्राथम्ये प्राप्ते उच्यते सवनीयस्यैव प्रथममुपाकरणम्। अग्नीषोमप्रणयनानन्तरमग्नीषोमीयस्योपस्थानम्। स तेनोपस्थितोऽपि सहालम्भवचनेन तत्स्थानाच्चलितत्वादननुष्ठितो ऽत्र तु न तस्य किंचिदुपस्थापकमस्ति। सवनीयस्तु स्वस्थानादप्रचलितः सत्राश्विनग्रहणादुपस्थितत्वात्तदनन्तरमुपाक्रियते। ततः साहित्यवचनादितरोपाकरणम्। अतः सवनीयस्यैव प्राथम्यम्। इतरयोस्तु कथं क्रमः? अनियम एव, तयोरुपस्थाने विशेषाभावात्। अथवा प्रकृतिदृष्टं पौर्वापर्यमस्तीति बाधेऽनुग्रहीतव्यमित्यग्नीषोमीयमुपाकृत्यानूबन्ध्योपाकरणमिति। तदेवं श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिसंज्ञानि षट् प्रमाणानि क्रमनियमकारीण्युक्तानि तेषां परस्परविरोधे च पूर्वं-पूर्वं बलवत् उत्तरमुत्तरं च दुर्बलमिति। तदुक्तम् "श्रुत्यर्थपठनस्थानमुख्यासत्तिप्रवृत्तिभिः। एकाख्यातगृहीतानां नियतः कर्मणां क्रमः। विरोधे पारदौर्बल्यमेतेषामपि पूर्ववदिति" भा०
(पूर्ववत् श्रुतिलिङ्गादिवत्)

क्रमस्य विनियोगसाधनता जै० सू० भाष्ययोर्दर्शिता यथा
"क्रमस्य देशसामान्यात्" ३।३।१२ सू०

"अथ किमेतावन्त्येव विनियोगकारणानि?। न,—इत्युच्यते। किं च क्रमस्य देशसामान्यात्, क्रमवतामानुपूर्व्येणोपदिश्यमानानां यस्य पर्याये यं धर्ममामनन्ति तस्य तं प्रति आकाङ्क्षा अनुमीयते, सत्यामाकाङ्क्षायामेकवाक्यभावः, तस्मात् ततो विनियोगः—इति। किमिहोदाहरणम्? किं च प्रयोजनम्?। आनुपूर्व्यवतां यागानामनुमन्त्रणेष्वाम्नातेषु उपांशुयाजस्य क्रमे "दब्धिर्नामासीति" समाम्नातः, तस्य आकाङ्क्षामुत्पाद्य तेन एकवाक्यतां यात्वा तत एव विनियोगमर्हति—इति, तथा च ऐन्द्राग्नं कर्म वियातमुज्जातस्य अस्ति भ्रातृव्यवतः, तस्य याज्यानुवाक्यायुगलमप्याम्नायते ऐन्द्राग्नम्, "इन्द्राग्नी रोचनादिवः प्रवर्षणेभ्यः"—इत्येकम्, अपरं "इन्द्राग्नी नवतिं पुरः श्नथद्वृत्रम्"—इति। तत्र लिङ्गाद्विनियोगे सिद्धे विशेषविनियोगो भवति, पूर्वं युगलं पूर्वस्य ऐन्द्राग्नस्य, उत्तरमुत्तरस्य—इति, एतत् उदाहरणम् प्रयोजनञ्च" भा०

क्रमप्रकरणयोरेकत्र समवाये प्रकरणं बलीयः। क्रमसमाख्ययोस्तु क्रमो बलीयान् "श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्" सू०।
"श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि। सा प्रक्रिया या० कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्या" पार्थसारथिमिश्रैर्विनियोगसाधकानां श्रुत्यादीनां लक्षणोक्त्या स्थानशब्दस्य क्रमवाचकतावगतेः। विवृतमेतत् तत्त्वबोधिन्यां यथा

"योगबलं प्रसिद्धावयवशक्ति--समाख्या योगार्थेन प्रवृत्तं पदम्। यथा हौत्रमाध्वर्यवमौद्गात्रमिति। दर्शपौर्णमासादिषु याज्यायाजकपाठादयो धर्मा ऋग्वेदोक्ता हौत्रसंज्ञकाः, दोहननिर्वापादयो यजुर्वेदोक्ता, आध्वर्यवसंज्ञकाः, स्तोत्रपाठादयः सामवेदोक्ता औद्गात्रसंज्ञकाः पदार्था उक्ताः। तत्रास्यैते धर्मा इति नियामकाभावात् स्वेच्छया सर्वेषां सर्वकरणप्रसक्तौ होतु-